श्री नारायण कवचं

श्री नारायण कवचं

राजोवाच |
यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् |
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियं || 1 ||

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकं |
यथाऽऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे || 2 ||

श्री शुक उवाच |
वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते |
नारायणाख्यं वर्माह तदिहैकमनाः शृणु || 3 ||

श्रीविश्वरूप उवाच |
धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः |
कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः || 4 ||

नारायणमयं वर्म सन्नह्येद्भय आगते |
दैवभूतात्मकर्मभ्यो नारायणमयः पुमान् || 5 ||

पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि |
मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत् || 6 ||

ॐ नमो नारायणायेति विपर्ययमथापि वा |
करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया || 7 ||

प्रणवादियकारांतमंगुळ्यंगुष्ठपर्वसु |
न्यसेद्धृदय ओंकारं विकारमनु मूर्धनि || 8 ||

षकारं तु भ्रुवोर्मध्ये णकारं शिखया न्यसेत् |
वेकारं नेत्रयोर्युंज्यान्नकारं सर्वसंधिषु || 9 ||

मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद्बुधः |
सविसर्गं फडंतं तत् सर्वदिक्षु विनिर्दिशेत् |
ॐ विष्णवे नम इति || 10 ||

आत्मानं परमं ध्यायेद्ध्येयं षट्छक्तिभिर्युतं |
विद्यातेजस्तपोमूर्तिमिमं मंत्रमुदाहरेत् || 11 ||

ॐ | हरिर्विदध्यान्मम सर्वरक्षां
न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे |
दरारिचर्मासिगदेषुचाप-
-पाशान् दधानोऽष्टगुणोऽष्टबाहुः || 12 ||

जलेषु मां रक्षतु मत्स्यमूर्ति-
-र्यादोगणेभ्यो वरुणस्य पाशात् |
स्थलेषु मायावटुवामनोऽव्यात्
त्रिविक्रमः खेऽवतु विश्वरूपः || 13 ||

दुर्गेष्वटव्याजिमुखादिषु प्रभुः
पायान्नृसिंहोऽसुरयूथपारिः |
विमुंचतो यस्य महाट्टहासं
दिशो विनेदुर्न्यपतंश्च गर्भाः || 14 ||

रक्षत्वसौ माध्वनि यज्ञकल्पः
स्वदंष्ट्रयोन्नीतधरो वराहः |
रामोऽद्रिकूटेष्वथ विप्रवासे
सलक्ष्मणोऽव्याद्भरताग्रजोऽस्मान् || 15 ||

मामुग्रधर्मादखिलात् प्रमादा-
-न्नारायणः पातु नरश्च हासात् |
दत्तस्त्वयोगादथ योगनाथः
पायाद्गुणेशः कपिलः कर्मबंधात् || 16 ||

सनत्कुमारोऽवतु कामदेवा-
-द्धयाननो मां पथि देवहेलनात् |
देवर्षिवर्यः पुरुषार्चनांतरात्
कूर्मो हरिर्मां निरयादशेषात् || 17 ||

धन्वंतरिर्भगवान् पात्वपथ्या-
-द्वंद्वाद्भयादृषभो निर्जितात्मा |
यज्ञश्च लोकादवताज्जनांता-
-द्बलो गणात् क्रोधवशादहींद्रः || 18 ||

द्वैपायनो भगवानप्रबोधा-
-द्बुद्धस्तु पाखंडगणात् प्रमादात् |
कल्किः कलेः कालमलात् प्रपातु
धर्मावनायोरुकृतावतारः || 19 ||

मां केशवो गदया प्रातरव्या-
-द्गोविंद आसंगवमात्तवेणुः |
नारायणः प्राह्ण उदात्तशक्ति-
-र्मध्यंदिने विष्णुररींद्रपाणिः || 20 ||

देवोऽपराह्णे मधुहोग्रधन्वा
सायं त्रिधामावतु माधवो मां |
दोषे हृषीकेश उतार्धरात्रे
निशीथ एकोऽवतु पद्मनाभः || 21 ||

श्रीवत्सधामाऽपररात्र ईशः
प्रत्यूष ईशोऽसिधरो जनार्दनः |
दामोदरोऽव्यादनुसंध्यं प्रभाते
विश्वेश्वरो भगवान् कालमूर्तिः || 22 ||

चक्रं युगांतानलतिग्मनेमि
भ्रमत् समंताद्भगवत् प्रयुक्तं |
दंदग्धि दंदग्ध्यरिसैन्यमाशु
कक्षं यथा वातसखो हुताशः || 23 ||

गदेऽशनिस्पर्शनविस्फुलिंगे
निष्पिंढि निष्पिंढ्यजितप्रियासि |
कूष्मांडवैनायकयक्षरक्षो-
-भूतग्रहांश्चूर्णय चूर्णयारीन् || 24 ||

त्वं यातुधानप्रमथप्रेतमातृ-
-पिशाचविप्रग्रहघोरदृष्टीन् |
दरेंद्र विद्रावय कृष्णपूरितो
भीमस्वनोऽरेर्हृदयानि कंपयन् || 25 ||

त्वं तिग्मधारासिवरारिसैन्य-
-मीशप्रयुक्तो मम छिंधि छिंधि |
चक्षूंषि चर्मन् शतचंद्र छादय
द्विषामघोनां हर पापचक्षुषां || 26 ||

यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च |
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽहोभ्य एव वा || 27 ||

सर्वाण्येतानि भगवन् नामरूपास्त्रकीर्तनात् |
प्रयांतु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः || 28 ||

गरुडो भगवान् स्तोत्रस्तोमश्छंदोमयः प्रभुः |
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः || 29 ||

सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः |
बुद्धींद्रियमनःप्राणान् पांतु पार्षदभूषणाः || 30 ||

यथा हि भगवानेव वस्तुतः सदसच्च यत् |
सत्येनानेन नः सर्वे यांतु नाशमुपद्रवाः || 31 ||

यथैकात्म्यानुभावानां विकल्परहितः स्वयं |
भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया || 32 ||

तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः |
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः || 33 ||

विदिक्षु दिक्षूर्ध्वमधः समंता-
-दंतर्बहिर्भगवान् नारसिंहः |
प्रहापयंल्लोकभयं स्वनेन
स्वतेजसा ग्रस्तसमस्ततेजाः || 34 ||

मघवन्निदमाख्यातं वर्म नारायणात्मकं |
विजेष्यस्यंजसा येन दंशितोऽसुरयूथपान् || 35 ||

एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा |
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते || 36 ||

न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् |
राजदस्युग्रहादिभ्यो व्याध्यादिभ्यश्च कर्हिचित् || 37 ||

इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः |
योगधारणया स्वांगं जहौ स मरुधन्वनि || 38 ||

तस्योपरि विमानेन गंधर्वपतिरेकदा |
ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः || 39 ||

गगनान्न्यपतत् सद्यः सविमानो ह्यवाक्छिराः |
स वालखिल्यवचनादस्थीन्यादाय विस्मितः |
प्रास्य प्राची सरस्वत्यां स्नात्वा धाम स्वमन्वगात् || 40 ||

श्रीशुक उवाच |
य इदं शृणुयात् काले यो धारयति चादृतः |
तं नमस्यंति भूतानि मुच्यते सर्वतो भयात् || 41 ||

एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः |
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् || 42 ||

इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे नारायणवर्मोपदेशो नामाष्टमोऽध्यायः |